श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।

वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ४९

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ४९

*वृन्दावनगमनवर्णनम्*

भवत्प्रभावाविदुरा हि गोपास्तरुप्रपातादिकमत्र गोष्ठे।
अहेतुमुत्पातगणं विशङ्क्य प्रयातुमन्यत्र मनो वितेनुः॥ १ ॥

तत्रोपनन्दाभिधगोपवर्यो जगौ भवत्प्रेरणयैव नूनम्।
इतः प्रतीच्यां विपिनं मनोज्ञं वृन्दावनं नाम विराजतीति॥ २ ॥

बृहद्वनं तत् खलु नन्दमुख्या विधाय गोष्ठीनमथ क्षणेन।
त्वदन्वितत्वज्जननीनिविष्टगरिष्ठयानानुगता विचेलुः॥ ३ ॥

अनोमनोज्ञध्वनिधेनुपालीखुरप्रणादान्तरतो वधूभिः।
भवद्विनोदालपिताक्षराणि प्रपीय नाज्ञायत मार्गदैर्घ्यम्॥ ४ ॥

निरीक्ष्य वृन्दावनमीश नन्दत्प्रसूनकुन्दप्रमुखद्रुमौघम्।
अमोदथाः शाद्वलसान्द्रलक्ष्म्या हरिन्मणीकुट्टिमपुष्टशोभम्॥ ५ ॥

नवाकनिर्व्यूढनिवासभेदेष्वशेषगोपेषु सुखासितेषु।
वनश्रियं गोपकिशोरपालीविमिश्रितः पर्यवलोकथास्त्वम्॥ ६ ॥

अरालमार्गागतनिर्मलापां मरालकूजाकृतनर्मलापाम्।
निरन्तरस्मेरसरोजवक्त्रां कलिन्दकन्यां समलोकयस्त्वम्॥ ७ ॥

मयूरकेकाशतलोभनीयं मयूखमालाशबलं मणीनाम्।
विरिञ्चलोकस्पृशमुच्चशृङ्गैर्गिरिं च गोवर्धनमैक्षथास्त्वम्॥ ८ ॥

समं ततो गोपकुमारकैस्त्वं समन्ततो यत्र वनान्तमागाः।
ततस्ततस्तां कुटिलामपश्यः कलिन्दजां रागवतीमिवैकाम्॥ ९ ॥

तथाविधेऽस्मिन् विपिने पशव्ये समुत्सुको वत्सगणप्रचारे।
चरन् सरामोऽथ कुमारकैस्त्वं समीरगेहाधिप पाहि रोगात्॥ १० ॥

**********